वज्रसूची[1]

ओं नमो मञ्जुनाथाय।

जगद्गुरुं मञ्जुघोषं नत्वा वाक्कायचेतसा ।
अश्वघोषो वज्रसूचीं सूत्रयामि यथामतम् ।। १ ।।

वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् ।
यस्य प्रमाणं न भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणम्[2] ।।२।।

(क) इह भवता यदिष्टं 'सर्ववर्णप्रधानं ब्राह्मणवर्णं' इति, वयमत्र ब्रूमः, कोऽयं ब्राह्मणो नाम। किं जीवः किं जातिः किं शरीरं किं ज्ञानं किमाचारः कि कर्म किं वेद इति ।

(ख) तत्र जीवस्तावद्[3] ब्राह्मणो न भवति। कस्माद्। वेदस्य[4] प्रामाण्याद्। उक्तं हि वेदे—

(ग) 'ओं सूर्यः पशुरासीत्[5], सोमः पशुरासीद्, इन्द्रः पशुरासीत्।[6]' पशवो देवाः। आद्यन्ते[7] देवपशवः। श्वपाका अपि देवा[8] भवन्ति।

(घ) अतो वेदप्रामाण्यान्मन्यामहे जीवत्वाद् ब्राह्मणो न भवति। भारतप्रामाण्यादपि।

उक्तं हि भारते:

सप्तव्याधा दशार्णेषु[9] मृगाः कालञ्जरे[10] गिरौ ।
चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ।। ३।।

तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः[11] ।। ४।।

(ङ) अतो भारतप्रामाण्याद् व्याधमृगहंसचक्रवाकदर्शनसम्भवान्मन्यामहे[12] जीवस्तावद् ब्राह्मणो न भवति। मानवधर्मप्रामाण्यादपि।

उक्तं हि मानवे धर्मे[१३]—

अधीत्य चतुरो वेदान्साङ्गोपाङ्गेन तत्त्वतः ।
शूद्रात्प्रतिग्रहग्राही ब्राह्मणो जायते खरः ।।५।।

खरो द्वादशजन्मानि षष्टिजन्मानि शूकरः[१४] ।
श्वानः सप्ततिजन्मानि-इत्येवं मनुरब्रवीत् ।।६।।

(च) अतो मानवधर्मप्रामाण्याज्जीवस्तावद् ब्राह्मणो न भवति।

(छ) जातिरपि ब्राह्मणो न भवति। कस्मात्? स्मृतिप्रामाण्याद्।

उक्तं हि स्मृतौ—

हस्तिन्यामचलो जात उलूक्यां केशपिङ्गलः ।
अगस्त्योऽगस्तिपुष्पाच्च कौशिकः कुशसम्भवः[१५] ।।७।।

कपिलः कपिलाजातः शरगुल्माच्च[१६] गौतमः ।
द्रोणाचार्यस्तु कलशा[१७]त्तित्तिरिस्तित्तिरीसुतः ।।८।।

रेणुकाऽजनयद्रामामृष्यशृङ्गमुनिं मृगी[१८] ।
कैवर्तिन्यजनयद् व्यासं[१९] कुशिकं[२०] चैव शूद्रिका ।।९।।

विश्वामित्रं[२१] च चण्डाली[२२] वसिष्ठं[२३] चैव उर्वशी ।
न तेषां ब्राह्मणी माता लोकाचाराच्च ब्राह्मणाः ।।१०।।

(ज) अतः स्मृतिप्रामाण्यान्मन्यामहे[२४] जातिस्तावद् ब्राह्मणो न भवति।

(झ) अथ मन्यसे माता वाऽब्राह्मणी भवेत् । तेषां पिता ब्राह्मणस्ततो ब्राह्मणो भवतीति। यद्येवं दासीपुत्रा अपि ब्राह्मणजनिता ब्राह्मणा भवेयुः। न चैतद्भवतामिष्टम्।

(ञ) किं च। यदि ब्राह्मणपुत्रो ब्राह्मणस्तर्हि ब्राह्मणाभावः प्राप्नोति। इदानीन्तनेषु ब्राह्मणेषु पितरि सन्देहाद्। गोत्रब्राह्मणमारभ्य ब्राह्मणीनां [२५]शूद्राभिगमनदर्शनाद्। अतो[२६] जातिर्ब्राह्मणो न भवति।[२७] मानवधर्म-प्रामाण्यादपि।

उक्तं हि मानवे[२८] धर्मे[२९]—

सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहाच्छूद्रश्च भवति ब्राह्मणः क्षीरविक्रयी ॥ ११ ॥

आकाशगामिनो विप्राः पतन्ति[३०] मांसभक्षणात् ।
विप्राणां पतनं दृष्ट्वा ततो मांसानि वर्जयेत् ॥ १२ ॥

(ट) अतो मानवधर्मप्रामाण्याज्जातिस्तावद् ब्राह्मणो न भवति। यदि हि जातिर्ब्राह्मणः स्यात्, तदा पतने[३१] शूद्रभावो नोपपद्यते। किं खलु दुष्टोऽप्यश्वः[३२] सूकरो[३३] भवेत्? तस्माज्जातिरपि ब्राह्मणो न भवति[३४]।

(ठ) शरीरमपि ब्राह्मणो न भवति।[३५] कस्माद्[३६]? यदि शरीरं ब्राह्मणः स्यात् तर्हि पावकोऽपि ब्रह्महा[३७] स्याद्। ब्रह्महत्या च बन्धूनां शरीरदहनाद्भवेद्। ब्राह्मणशरीरनिष्यन्दजाताश्च क्षत्रियवैश्यशूद्रा अपि ब्राह्मणाः स्युः। न चैतद् दृष्टं। ब्राह्मणशरीरविनाशाच्च यजनयाजना-ध्ययनाध्यापनदानप्रतिग्रहादीनां ब्राह्मणशरीरजनितानां फलस्य विनाशः स्यात्। न चैतदिष्टम्[३८]। अतो मन्यामहे शरीरमपि ब्राह्मणो न भवति।[३९]

(ड) ज्ञानमपि ब्राह्मणो न भवति। कुतः? ज्ञानबाहुल्याद्। ये ये ज्ञानवन्तः शूद्रास्ते सर्व एव ब्राह्मणाः स्युः। दृश्यन्ते[४०] च क्वचित् शूद्रा अपि वेदव्याकरणमीमांसासांख्यवैशेषिकनग्नाजीवकादिसर्वशास्त्रार्थ-विदः। न च ते ब्राह्मणाः स्युः। अतो मन्यामहे ज्ञानमपि ब्राह्मणो न भवति।

(ढ) आचारोऽपि ब्राह्मणो न भवति। कुतः? यद्याचारो ब्राह्मणः स्यात्[४१] तदा ये य आचारवन्तः शूद्रास्ते सर्वे ब्राह्मणाः स्युः। दृश्यन्ते च

नटभटकैवर्तभण्डप्रभृतय:[४२] प्रचण्डतरविविधाचारवन्तो न च ते ब्राह्मणा भवन्ति। तस्मादाचारोऽपि ब्राह्मणो[४३] न भवति।

(ण) कर्मापि ब्राह्मणो न भवति। कुत:? दृश्यन्ते हि क्षत्रिय-वैश्यशूद्रा यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहप्रसङ्गविविधानि[४४] कर्माणि कुर्वन्तो, न च ते ब्राह्मणा भवतां सम्मता:। तस्मात्कर्मापि ब्राह्मणो न भवति।

(त) वेदेनापि ब्राह्मणो न भवति। कस्माद्? रावणो नाम राक्षसोऽभूत्। तेनाधीताश्चत्वारो वेदा:। ऋग्वेदो यजुर्वेद: सामवेदोऽथर्व-वेदश्चेति। राक्षसानामपि गृहे गृहे वेदव्यवहार: प्रवर्तत एव। न च ते ब्राह्मणा: स्यु:। अतो मन्यामहे वेदेनापि ब्राह्मणो न भवतीति।[४५]

(थ) कथं तर्हि ब्राह्मणत्वं भवति।

उच्यते—

ब्राह्मणत्वं न शास्त्रेण न संस्कारैर्न जातिभि: ।
न कुलेन न वेदेन न[४६] कर्मणा भवेत्तत:[४७] ।। १३ ।।

(द) कुन्देन्दुधवलं हि ब्राह्मणत्वं[४८] नाम सर्वपापस्यापाकरण-मिति[४९]।[५०]

(ध) उक्तं हि—व्रततपोनियमोपवासदानदमशमसंयमो[५१]पचाराच्च।[५२]

तथा चोक्तं वेदे[५३]—

निर्ममो[५४] निरहङ्कारो नि:सङ्गो निष्परिग्रह: ।
रागद्वेषविनिर्मुक्तस्तं देवा ब्राह्मणं विदु: ।। १४ ।।[५५]

सर्वशास्त्रेऽप्युक्तम्[५६]—

सत्यं ब्रह्म तपो ब्रह्म ब्रह्म चेन्द्रियनिग्रह: ।
सर्वभूते दया ब्रह्म एतद् ब्राह्मणलक्षणम् ।। १५ ।।

सत्यं नास्ति तपो नास्ति नास्ति चेन्द्रियनिग्रहः ।
सर्वभूते दया नास्ति एतच्चा[५७]ण्डाललक्षणम्[५८] ।। १६ ।।

देवमानुष[५९]नारीणां तिर्यग्योनिगतेष्वपि ।
मैथुनं नाधिगच्छन्ति ते विप्रास्ते च ब्राह्मणाः ।। १७ ।।

शुक्रेणाप्युक्तम्[६०] :

न जातिर्दृश्यते तावद् गुणाः कल्याणकारकाः ।
चण्डालोऽपि हि तत्रस्थस्तं देवा ब्राह्मणं विदुः ।। १८ ।।

(न) तस्मान्न जातिर्न जीवो न शरीरं न ज्ञानं नाचारो न कर्म न वेदो ब्राह्मण इति।

(प) अन्यच्च भवतोक्तम्—'इह शूद्राणां प्रव्रज्या न विधीयते। ब्राह्मणशुश्रूषैव तेषां धर्मो विधीयते। चतुर्षु वर्णेष्वन्ते वचनात्ते नीचा' इति।

(फ) यद्येवमिन्द्रोऽपि नीचः स्यात्। 'श्वयुवमघोनामतद्धिते[६१]' इति सूत्रवचनात्। श्वा इति कुक्कुरः । युवा इति पुरुषः। मघवा इति सुरेन्द्रः। तयोः श्वपुरुषयोरिन्द्र एव नीचः स्यात्। न चैतद् दृष्टं[६२] किं हि वचनमात्रेण दोषो भवति। तथा च। उमामहेश्वरौ। दन्तौष्ठमित्यपि लोके प्रयुज्यते। न च दन्ताः प्रागुत्पन्ना उमा[६३] वा। केवलं वर्णसमासमात्रं क्रियते ब्रह्मक्षत्रविट्शूद्रा[६४] इति। तस्माद्या भवदीय[६५]-प्रतिज्ञा 'ब्राह्मणशुश्रूषैव तेषां धर्मः' [सा] न भवति।

(ब) किं चानिश्चितोऽयं ब्राह्मणप्रसङ्गः।

उक्तं हि मानवे[६६] धर्मे[६७]—

वृषलीफेनपीतस्य निःश्वासोपहतस्य च ।
तत्रैव च प्रसूतस्य निष्कृतिर्नोपलभ्यते ।। १९ ।।

शूद्रीहस्तेन यो भुंक्ते मासमेकं निरन्तरम् ।
जीवमानो भवेच्छूद्रो मृतः श्वानश्च जायते[६८] ।। २० ।।

शूद्रीपरिवृतो विप्रः शूद्री च गृहमेधिनी ।
वर्जितः पितृदेवेन रौरवं सोऽधिगच्छति[६९] ।। २१ ।।

(भ) अतोऽस्य वचनस्य[७०] प्रामाण्यादनियतोऽयं ब्राह्मणप्रसङ्गः ।

(म) किं चान्यत्। शूद्रोऽपि ब्राह्मणो भवति। को हेतुः? इह हि मानवे धर्मेऽभिहितम्[७१]—

अरणी[७२]गर्भसम्भूतः कठो[७३] नाम महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। २२ ।।

कैवर्तीगर्भसम्भूतो व्यासो[७४] नाम महामुनिः[७५] ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम्[७६] ।। २३ ।।

उर्वशीगर्भसम्भूतो वसि[७७]ष्ठोऽपि[७८] महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। २४ ।।

हरिणीगर्भसम्भूत ऋष्यशृङ्गो महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। २५ ।।

चण्डालीगर्भसम्भूतो विश्वामित्रो महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। २६ ।।

ताण्डुली[७९]गर्भसम्भूतो नारदो हि[८०] महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम्[८१] ।। २७ ।।

जितात्मा निष्प्रतिद्वन्द्वः पञ्च जित्वा यतेन्द्रियः ।
तपसा ब्राह्मणो जातो[८२] ब्रह्मचर्येण ब्राह्मणः[८३] ।। २८ ।।

न च ते ब्राह्मणीपुत्रास्ते च लोकस्य ब्राह्मणाः ।
शीलशौचमयं ब्रह्म तस्मात्कुलम[८४]कारणम्[८५] ।। २९ ।।

शीलं प्रधानं न कुलं प्रधानं
कुलेन किं शीलविवर्जितेन ।
बहवो नरा नीचकुल[८६]प्रसूताः
स्वर्गं[८७] गताः शीलमुपेत्य धीराः[८८] ।। ३० ।।

(य) के पुनस्ते कठ[८९]व्यासवसि[९०]ष्ठऋष्यशृङ्गविश्वामित्रप्रभृतयो[९१] ब्रह्मर्षयो नीचकुल[९२]प्रसूतास्ते च लोकस्य ब्राह्मणाः। तस्मादस्य वचनस्य[९३]-प्रामाण्यादप्य[९४]नियतोऽयं ब्राह्मणप्रसङ्ग इति, शूद्रकुलेऽपि ब्राह्मणो भवति।

(र) किं चाप्यन्यद् भवदीय[९५]मतम्—

मुखतो ब्राह्मणो जातो बाहुभ्यां क्षत्रियस्तथा[९६] ।
ऊरुभ्यां वैश्यः संजातः पद्भ्यां शूद्रक[९७] एव च[९८] ।। ३१ ।।

(ल) अत्रोच्यते। ब्राह्मणा बहवो न ज्ञायन्ते कुतो मुखतो जाता ब्राह्मणा इति। इह हि कैवर्तरजकचण्डालकुलेष्वपि ब्राह्मणाः सन्ति। तेषामपि चूडाकरणमुञ्जदण्ड[९९]काष्ठादिभिः[१००] संस्काराः क्रियन्ते। तेषामपि ब्राह्मणसंज्ञा क्रियते। तस्माद् ब्राह्मणवत्क्षत्रिया[१०१]दयोऽपि। इति पश्याम एकवर्णः, नास्ति चातुर्वर्ण्यमिति ।

(व) अपि च। एकपुरुषोत्पन्नानां कथं चातुर्वर्ण्यम्। इह कश्चिद्देवदत्त एकस्यां स्त्रियां चतुरः पुत्राञ्जनयति। न च तेषां वर्णभेदोऽस्ति। अयं ब्राह्मणोऽयं क्षत्रियोऽयं वैश्योऽयं शूद्र इति। कस्मात्? एकपितृकत्वाद्। एवं ब्राह्मणादीनां कथं चातुर्वर्ण्यम्।[१०२]

(श) इह हि[१०३] गोहस्त्यश्वमृगसिंहव्याघ्रादीनां पदविशेषो दृष्टः। गोपदमिदं हस्तिपदमिदमश्वपदमिदं मृगपदमिदं सिंहपदमिदं व्याघ्रपद-मिदमिति। न च ब्राह्मणादीनां[१०४] ब्राह्मणपदमिदं क्षत्रियपदमिदं वैश्य-पदमिदं शूद्रपदमिदमिति। अतः पदविशेषाभावादपि पश्याम एकवर्णः, नास्ति चातुर्वर्ण्यम्।

(ष) इह गोमहिषाश्वकुञ्जरखरवानरछागैडकादीनां भगलिङ्ग-वर्णसंस्थानमलमूत्रगन्धध्वनिविशेषो दृष्टः, न तु ब्राह्मणक्षत्रियादीनाम्। अतोऽप्यविशेषादेक एव वर्ण इति।

(स) अपि च। यथा हंसपारावतशुककोकिलशिखण्डिप्रभृतीनां रूप-वर्णलोमतुण्डविशेषो दृष्टः, न तथा ब्राह्मणादीनाम्। अतोप्यविशेषदेक एव वर्ण इति।

(ह) यथा वटबकुलपलाशाशोकतमालनागकेशर[१०५]शिरीषचम्पक-प्रभृतीनां वृक्षाणां विशेषो दृश्यते, यदुत[१०६] दण्डतश्च पत्रतश्च पुष्पतश्च फलतश्च त्वगस्थिबीजरसगन्धतश्च, न तथा ब्राह्मण[१०७]क्षत्रियविट्शूद्रा-णामङ्गप्रत्यङ्गविशेषो न च त्वङ्मांसशोणितास्थिशुक्रमलवर्णसंस्थान-विशेषणं नापि प्रसवविशेषो दृश्यते[१०८]। ततोऽप्यविशेषादेक एव वर्णो भवति।

(क्ष) अपि भो ब्राह्मण सुखदुःखजीवितबुद्धिव्यापारव्यवहार-मरणोत्पत्तिभयमैथुनोपचारसमतया नास्त्येव विशेषो ब्राह्मणादीनाम्।

(त्र) इदं चावगम्यताम्। यथैकवृक्षोत्पन्नानां फलानां नास्ति वर्णभेद उदुम्बरपणसफलवद्। उदुम्बरस्य हि पणसस्य च फलानि कानिचित् शाखातो भवन्ति कानिचिद् दण्डतः कानिचित्स्कन्धतः कानिचिन्मूलतः। न च तेषां भेदोऽस्तीदं ब्राह्मण[१०९]फलमिदं क्षत्रियफलमिदं वैश्यफलमिदं शूद्रफलमिति। एकवृक्षोत्पन्नत्वाद्। एवं नराणामपि नास्ति भेदः। एकपुरुषोत्पन्नत्वाद्।[११०]

(ज्ञ) अन्यच्च दूषणं भवति। यदि मुखतो[१११] जातो भवति ब्राह्मणो ब्राह्मण्याः कुत उत्पत्तिः। मुखादेवेति चेद्? हन्त तर्हि भवतां भगिनी-प्रसङ्गः स्यात्। तथा गम्यागम्यं न सम्भाव्यते। तच्च लोकेऽत्यन्तविरुद्धम्। तस्मादनियतं ब्राह्मण्यम्।[११२]

(अ) क्रियाविशेषेण खलु चतुर्वर्णव्यवस्था क्रियते। तथा च युधिष्ठिराध्येषितेन वैशम्पायनेनाभिहितं क्रियाविशेषतश्चातुर्वर्ण्यमिति :

पाण्डोस्तु[११३] विश्रुतः पुत्रः स वै नाम्ना युधिष्ठिरः ।
वैशम्पायनमागम्य प्राञ्जलिः परिपृच्छति ।। ३२ ।।

के च[११४] ते ब्राह्मणाः प्रोक्ताः किं वा ब्राह्मणलक्षणम्।
एतदिच्छामि भो ज्ञातुं तद्भवान् व्याकरोतु मे ।। ३३ ।।

वैशम्पायन उवाच :

क्षान्त्यादिभिर्गुणैर्युक्तस्त्यक्तदण्डो निरामिषः ।
न हन्ति सर्वभूतानि प्रथमं ब्रह्मलक्षणम्[११५] ।। ३४ ।।

यदा सर्वं परद्रव्यं पथि वा यदि वा गृहे ।
अदत्तं नैव गृह्णाति द्वितीयं ब्रह्मलक्षणम्[११६] ।। ३५ ।।

त्यक्त्वा क्रूरस्व[११७]भावं तु निर्ममो निष्परिग्रहः ।
मुक्तश्चरति यो नित्यं तृतीयं ब्रह्मलक्षणम्[११८] ।। ३६ ।।

देवमानुष[११९]नारीणां तिर्यग्योनिगतेष्वपि ।
मैथुनं हि सदा त्यक्तं चतुर्थं ब्रह्मलक्षणम् ।। ३७ ।।

सत्यं शौचं दया शौचं शौचमिन्द्रियनिग्रहः ।
सर्वभूत[१२०]दया शौचं तपः शौचञ्च[१२१] पञ्चमम्[१२२] ।। ३८ ।।

पञ्चलक्षणसम्पन्न ईदृशो यो भवेद् द्विजः ।
तमहं ब्राह्मणं ब्रूयां शेषाः शूद्रा युधिष्ठिर ।। ३९ ।।

न कुलेन न जात्या वा क्रियाभिर्ब्राह्मणो भवेत्[१२३] ।
चण्डालो[१२४]ऽपि हि वृत्तस्थो ब्राह्मणः स युधिष्ठिर[१२५] ।।४० ।।[१२६]

किं च भूयो वैशम्पायनेनोक्तम् :

एकवर्णमिदं पूर्वं विश्वमासीद् युधिष्ठिर ।
कर्मक्रियाविशेषेण चातुर्वर्ण्यं प्रतिष्ठितम्[१२७] ।। ४१ ।।

सर्वे वै योनिजा मर्त्याः सर्वे मूत्रपुरीषिणः ।
एकेन्द्रियेन्द्रियार्थाश्च तस्माच्छीलगुणैर्द्विजाः ।। ४२ ।।

शूद्रोऽपि शीलसम्पन्नो गुणवान् ब्राह्मणो भवेत् ।
ब्राह्मणोऽपि क्रियाहीनः शूद्रात्प्रत्यवरो[१२८] भवेत्[१२९] ।। ४३ ।।

इदं च वैशम्पायनवाक्यम् :

पञ्चेन्द्रियार्णवं घोरं यदि शूद्रोऽपि तीर्णवान् ।
तस्मै दानं प्रदातव्यमप्रमेयं युधिष्ठिर ।। ४४ ।।

न जातिर्दृश्यते राजन् गुणाः कल्याणकारकाः ।
जीवितं यस्य धर्मार्थे[१३०] परार्थे यस्य जीवितम् ।
अहोरात्रं चरेत्क्षान्तिं तं देवा ब्राह्मणं विदुः[१३१] ।। ४५ ।।

परित्यज्य गृहावासं ये स्थिता मोक्षकाङ्क्षिणः ।
कामेष्वसक्ताः कौन्तेय ब्राह्मणास्ते युधिष्ठिर[१३२] ।। ४६ ।।

अहिंसा निर्ममत्वं चा[१३३]मतकृत्यस्य वर्जनम् ।
रागद्वेषनिवृत्तिश्च एतद् ब्राह्मणलक्षणम् ।। ४७ ।।

क्षमा दया दमो दानं सत्यं शौचं स्मृतिर्घृणा ।
विद्या विज्ञानमास्ति[१३४]क्यमेतद् ब्राह्मणलक्षणम्[१३५] ।। ४८ ।।

गायत्रीमात्र[१३६]सारोऽपि वरं[१३७] विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी[१३८] सर्वाशी सर्वविक्रयी[१३९] ।। ४९ ।।

एकरात्रोषितस्यापि या गतिर्ब्रह्मचारिणः ।
न तत्क्रतुसहस्रेण प्राप्नुवन्ति युधिष्ठिर[१४०] ।। ५० ।।

पारगं सर्ववेदानां सर्वतीर्थाभिषेचनम् ।
मुक्त[१४१]श्चरति यो धर्मं तमेव ब्राह्मणं विदुः[१४२] ।। ५१ ।।

यदा न कुरुते पापं सर्वभूतेषु दारुणम् ।
कायेन मनसा वाचा ब्रह्म सम्पद्यते तदा[१४३] ।। इति ।।५२।।

अस्माभिरुक्तं यदिदं द्विजानां
मोहं निहन्तुं हतबुद्धिकानाम् ।
गृह्णन्तु सन्तो यदि युक्तमेतन्-
मुञ्चन्त्वथायुक्तमिदं यदि स्यात् ।।५३।।

।। कृतिरियं सिद्धाचार्याश्वघोषपादानामिति ।।

।। [१४४]शुभम् ।।

•

---

१. कतिपय हस्तलिखित प्रतियों में इस ग्रन्थ का प्रारम्भ निम्नलिखित रूप में मिलता है—

(१) 'श्रीः। अथ वज्रसूचीग्रन्थः।' (भण्डारकर ओरियण्टल रिसर्च इन्स्टीचूट, पूना-हस्तलेख)।

(२) 'वज्रसूच्युपनिषद्व्याख्या'—(आडियार लायब्रेरी, आडियार, मद्रास-हस्तलेख)।

२. वाजसनयी संहिता, २३.१७.; तैत्तिरीय संहिता, ५.७.२६; शतपथ ब्राह्मण, १३.२.७, १३-१५; काठक, अश्वमेध, ५.५.४।

३. जीवत्वाद्, पूना-हस्तलेख।

४. वेद्, मद्रास-हस्तलेख।

५. (क) ॐ अग्निः पशुरासीत्तेनायजन्त स एवं जयद् यस्मिन्नग्निः। स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। सूर्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन् सूर्यः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः॥ —शुक्लयजुर्वेदसंहिता-२३.१७

(ख) अग्निः पशुरासीत्। तेनायजन्त स एतं लोकमजयत्। यस्मिन्नग्निः। स ते लोको भविष्यति। तं जेष्यसि। पिबैता अपः इति। यावानग्नेर्विजयः। यावान् लोकः। यावदैश्वर्यं तावांस्ते विजयः। तावान् लोकः। तावदैश्वर्यं भविष्यतीत्येवैनं तदाह॥

वायुः पशुरासीत्। तेनायजन्त.............तदाह ॥
सूर्यः पशुरासीत्। तेनायजन्त.............तदाह ॥ —शतपत्रब्राह्मण-१३.२.८.१३-१५

६. प्रमाणमप्रमाणं वै यः कुर्यादबुधो जनः।
न स प्रमाणतामर्हो विवादजननो हि सः।। —महाभारत अनुशासन-पर्व, १६२, २५

७. अद्यन्ते, आवर्तन्ते, पूना-हस्तलेख।

८. ब्राह्मण, बंगाल हस्तलेख।

९. दशारण्ये, पूना, बंगाल, मद्रास-हस्तलेख।

१०. कालिञ्जरे, कालिञ्जले, आवर्तन्ते, बंगाल हस्तलेख।

११. हरिवंश, २४.२०-२१

१२. जराजन्मान्तरक्लेशदुष्टग्राहकुलाकुलम् ।
नरतिर्यगसच्छूद्रयोनिदुःखोर्मिसङ्कटम् ।।
दौःस्थित्यरोगशोकार्तिजलावर्तसमन्वितम् ।
श्वानशूकरचाण्डालकृमिकूर्मादिकायकम् ।।
संसारसागरं घोरं मग्नः खलु परिप्लवन् ।
भूरिपापभराक्रान्तः स जीवो ब्राह्मणः कथम् ।। —भविष्य ब्राह्मण, ४०.२३-२९
ब्रह्म उवाच—
सप्तव्याधकथा विप्रा मनुना परिकीर्तिता ।
तां निशम्य यदुश्रेष्ठ नित्यं जातिपदं त्यजेत् ।।
तस्मान्न जीवे ब्राह्मण्यं पश्यामो हि कथञ्चन ।।

१३. मनुस्मृतिः, १०,१०६-११० भाव-साम्य के लिये तुलनीय।
अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः ।
पतितात्प्रतिगृह्याथ खरयोनौ प्रजायते ।।
खरो जीवति वर्षाणि दश पञ्च च भारत ।। —महाभारत अनुशासन-पर्व, १११, ४६-४७

१४. सूकरः, पूना, बंगाल-हस्तलेख।

१५. शूद्रीगर्भसमुत्पन्नः कुशिकश्च महामुनिः। —वृहद्देवता, ४.९८
तथा च कौशिकस्तात तपोनित्यो जितेन्द्रियः ।
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ।। —महाभारत शल्य० ४०.११

१६. शाल, शालि, शार, मद्रास, बंगाल हस्तलेख।

१७. तस्माच्च कलशाज्जातो द्रोणः शस्त्रभृतां वरः । —शिव धर्म-सं०, १२.७६
आचार्यः कलशाज्जातो द्रोणः शस्त्रभृतां वरः । —महाभारत आदि-पर्व, १३७.१५

१८. ऋष्यशृङ्गः समुत्पन्नो ब्रह्मचारी महायशाः ।
विभाण्डकस्य मृग्यां च तपोयोगात्मको मुनिः ।।
शाङ्ग्‍‍र्यां च मन्दपालस्य चत्वारो ब्रह्मवादिनः ।
जाता ब्रह्मर्षयः पुण्या यैः स्तुतो हव्यवाहनः ।।

महर्षेः कालवृक्षस्य शकुन्त्यामेव जज्ञिवान् ।
हिरण्यहस्तो भगवान् महर्षिः काञ्चनप्रभः ।।
शाण्डिल्यश्चाग्नितो जातः काश्यपस्यात्मजः प्रभुः ।
शरद्वतः शरस्तम्बात् कृपश्च कृपया सह ।। —मिला० भाग०, ९.२२.३६

१९. जातो व्यासस्तु कैवर्त्याः श्वपाक्याश्च पराशरः ।
शुक्याः शकः कणादाख्यस्तथोलूक्याः सुतोऽभवत्।।
मृगीजोऽथर्षश्रृङ्गोऽपि वसिष्ठो गणिकात्मजः ।
मुनिरौर्वशेयः .... ।। —बुद्धचरित, ९.९

२०. कौशिकम्, पूना , बंगाल, मद्रास-हस्तलेख ।

२१. ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रस्तथा मुनिः ।। —महाभारत शल्य ३९.३७

२२. चाण्डाली, बंगाल , मद्रास-हस्तलेख।

२३. वैश्यश्चित्रमुखः कन्यां वसिष्ठतनयस्य वै ।
शुभां प्रादाद्यतो जातो ब्रह्मर्षिस्तु पराशरः ।।
तथैव दासकन्यायां सत्यवत्यां महानृषिः ।
पराशरात्प्रसूतश्च व्यासो योगमयो मुनिः ।। —मिला० बुद्ध, ४.७६
व्याघ्रयोन्यां ततो जाता वसिष्ठस्य महात्मनः ।
एकोनविंशतिः पुत्राः ख्याता व्याघ्रपदादयः ।।
एते चान्ये च विख्याताः पृथिव्यां गोत्रतां गताः ।
नाऽसाध्यं तपसा तेषां विद्ययात्मगुणैः परैः ।। —महाभारत अनुस्मृति २१

२४. प्रामाण्याज्जातिः, पूना, मद्रास-हस्तलेख।

२५. शूद्रपर्यन्तमभि, पूना, मद्रास-हस्तलेख।

२६. ततो, बंगाल-हस्तलेख।

२७. समानोद्धरण के लिए द्रष्टव्य—
किं ब्राह्मणस्य पितरं किमु पृच्छसि मारतम् ।
श्रुतं चेदस्मिन् वेद्यं स पिता स पितामहः ।। —काठक, ३०.१०
जातिरत्र महासर्प मनुष्यत्वे महामते ।
सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ।
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।। —महाभारत, वनपर्व, १८०.३१-३२
अनादाविह संसारे दुर्वारे मकरध्वजे ।
कुले च कामिनीमूले का जातिः परिकल्पिता ।।
—नैषध, १८.४०; महाभारत मातङ्गोपाख्यान, अनुस्मृति २७
शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः ।
तदानन्तकुलादोषाददोषा जातिरस्ति का ।। —नैषधचरित, १७.४०

२८. व, बंगाल-हस्तलेख।

२९. मनुस्मृति, १०.९२; याज्ञवल्क्य०, ३.४०; वसिष्ठ०।

---

३०. न्ते, पूना , मद्रास-हस्तलेख।

३१. न, बंगाल, पूना, मद्रास-हस्तलेख।

३२. द्, बंगाल -हस्तलेख।

३३. स्, पूना, बंगाल-हस्तलेख।

३४. भवेत्, पूना, मद्रास-हस्तलेख।

३५. [पञ्चस्कन्धात्मकं सर्वं] शरीरं खलु भिक्षवः ।
अनित्यं दुःखशून्यञ्च न जातिर्न च जातिमान् ॥१०३
—आचार्य आर्यदेव, चित्तविशुद्धिप्रकरण, विश्वभारती शान्तिनिकेतन, १९४९

३६. य, बंगाल-हस्तलेख।

३७. ब्रह्महा, मद्रास-हस्तलेख।

३८. दृष्टं, पूना, बंगाल-हस्तलेख।

३९. पृथिव्युदकवाय्वग्नि-परिणामाविशेषतः ।
देहतः सर्वभूतानां ब्राह्मत्वप्रसङ्गतः ।।
...तस्मान्न देहे ब्राह्मण्यं नापि देहात्मकं भवेत्।।
वर्णापसद-चाण्डालश्वादादीनां प्रसज्यते ।
यदि देहस्य विप्रत्वं भवद्‌भिरुपगम्यते ।। —भविष्य ब्राह्मण ४१.५३-५६

४०. दश्यते, मद्रास, बंगाल-हस्तलेख।

४१. भवेत्, पूना-हस्तलेख।

४२. भटभण्डकै, बंगाल-हस्तलेख।

४३. णोऽपि, बंगाल-हस्तलेख।

४४. ङ्गादि, पूना, मद्रास-हस्तलेख।

४५. वेदाध्ययनमप्येतद् ब्राह्मण्यं प्रतिपद्यते ।
विप्रवद्वैश्यराजन्यौ राक्षसा रावणादयः ।।
श्वादचाण्डालदासाश्च लुब्धकाभीरधीवराः ।
येऽन्येऽपि वृषलाः केचित्तेऽपि वेदानधीयते ।।
शूद्रा देशान्तरं गत्वा ब्राह्मण्यं क्षत्रियं श्रिताः ।
व्यापाराकारभाषाद्यैर्विप्रतुल्याः प्रकल्पिताः ।।
वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
प्रोद्वहन्ति शुभां कन्यां शुद्धब्राह्मणजां नराः ।
गौडपूर्वां कृतामीयुर्जातिं वा दाक्षिणात्यजाम् ।।
अपरिज्ञातशूद्रत्वाद् ब्राह्मण्यं यान्ति कामतः ।।
तस्मान्न ज्ञायते भेदो वेदाध्यायक्रियाकृतः ।। —भविष्य ब्राह्मण ४१.१-६

४६. कर्माणा न, पूना, मद्रास-हस्तलेख।

४७. तुलनीय—
न योनिर्नापि संस्कारो न श्रुतं नापि सन्ततिः ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ।। —महाभारत, अनु०, १४३.५०
पुत्रो गृत्समदस्यापि शुनको यस्य शौनकाः ।
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च ।।
—हरिवंश २९/८; विष्णुपुराण, ४.८.१; वायुपुराण, २.३०.४
वत्सस्य वत्सभूमिस्तु भार्गभूमिस्तु भार्गवात् ।
एते त्वङ्गिरसः पुत्रा जाता वंशेऽथ भार्गवे ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च भरतर्षभ ।।
—हरिवंश, २९.८२-८३; ३२.४०-४१; विष्णुपुराण, ४.८-९
मनो...र्नाभागनेदिष्टकरुषपृषध्राख्याः पुत्राः बभूवुः। पृषध्रस्तुगुरुगोवधात्शूद्रत्वमगमत्। करुषात्कारुषा महाबलाः क्षत्रिया बभूवुः। ...नेदिष्टपुत्रस्तु वैश्यतामगमत्।
—विष्णुपुराण, ४.१.५-१५; हरिवंश, ११.९-११; अग्निपुराण, २७३.१७-१८; मार्कण्डेय पुराण, परिच्छेद ११२-११३
गर्गाच्छिनिस्ततो गार्ग्याः शैन्याः। क्षत्रोपेता द्विजातयो बभूवुः।
—विष्णुपुराण, ४.१९.९; भगवत, ९.२१.१९; मत्स्य पुराण, परिच्छेद ४९.४१
मुद्गलाच्च मौद्गल्याः क्षत्रोपेता द्विजातयो बभूवुः ।।
—विष्णुपुराण, ४.१९.१६; भगवत, ९.२१.३३; मत्स्य पुराण, परिच्छेद ५०.५; हरिवंश पुराण, ३२.६७-६८
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ।। —विष्णुपुराण, ४.२.२
अप्रतिरथात्कण्वस्तस्यापि मेधातिथिः। यतो काण्वायना द्विजा बभूवुः।
—विष्णुपुराण, ४.१९.२; मत्स्य पुराण, परिच्छेद ४६.४७
महावीर्यादुरुक्षयो नाम पुत्रोऽभूत्। तस्य..पुत्रत्रयमभूत्। तच्च त्रितयमपि पश्चाद् विप्रतामुपजगाम। —विष्णुपुराण, ४.१९.१०

४८. -णं हि, बंगाल-हस्तलेख।

४९. -प-, बंगाल-हस्तलेख।
सब्बपापस्स अकरणं कुसलस्स उपसम्पदा ।
सचित्तपरियोदयनं एतं बुद्धान सासनं ॥ —धम्मपद-१४/५

५०. चन्दं व विमलं सुद्धं विप्पसन्नमनाविलं ।
नन्दीभवपरिक्खीणं तमहं ब्रूमि ब्राह्मणं ।। —धम्मपद ब्राह्मणवग्गो, २६, श्लोक ३१
खत्ती परमं तपो तितिक्खा निब्बाणं परमं वदन्ति बुद्धाः। —धम्मपद-१४/६

५१. -माचा-, बंगाल-हस्तलेख।

५२. शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ।। —भगवद्गीता, १८.४२

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ।। —भगवद्गीता, ७.११.२१; ११.१७.१६
सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा ।
यत्रैतल्लक्ष्यते सर्प स ब्राह्मण इति स्मृतः ।। —महाभारत, वनपर्व, १८०.२१

५३. निर्ममो निरहङ्कारः सर्वसङ्गविवर्जितः ।।
निर्भयो निर्ममो नित्यं निर्द्वन्द्वो निष्परिग्रहः ।।
निर्ममो निरहङ्कारो निरपेक्षो निरामिषः ।। —नारदपरिव्राजकोपनिषद्, ३.६
निरहं च निर्ममः। कुण्डिकोपनिषद्, १७
निर्ममो निरहं सुखी। आत्मोपनिषद्, ११ तथा द्रष्टव्य अन्य लघूपनिषदें भी।
निर्ममो निरहङ्कारः। भगवद्गीता, २.७१; १२.१३
निराशीर्निर्ममो। भगवद्गीता, ३.१०
निर्ममः शान्तो। भगवद्गीता, १८.५३
निर्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः ।। —महाभारत, अनुस्मृति, १०८.५
निर्ममो निरहङ्कारो निर्योगक्षेम आत्मवान् ।
निराशीनिर्गुणः शान्तो निरासक्तो निराश्रयः ।।
—महाभारत, अश्व०, ४६.४५-४६; ४७.९, १५
निर्ममो निरहङ्कारो निरपेक्षो निराशिषः ।
निराशः सर्वभूतेषु निराशीर्निष्परिग्रहः ।।
न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ।।
—बृहस्पति-वचनम्, उद्धृत यतिधर्मसंग्रह, पृ० ८९

५४. -न्दो, बंगाल-हस्तलेख।

५५. योध पुञ्ञञ्च पापञ्च उभो सङ्गं उपच्चगा ।
असोकं विरजं सुद्धं तमहं ब्रूमि ब्राह्मणं ।। —धम्मपद-२६/३०

५६. सत्यं ब्रह्म तपः सत्यं—महाभारत, शान्तिपर्व, १९०.१
सत्यं ब्रह्म यथाभूतं ब्रुवन्तो ब्राह्मणाश्च ये ।। —वायुपुराण, ८.१६३

५७. च्च, मद्रास-हस्तलेख।

५८. निर्दयः सर्वभूतेषु विप्रश्चाण्डाल उच्यते। अत्रि-स्मृति, श्लोक ३७४

५९. मनुष्य, बंगाल-हस्तलेख।

६०. न जात्या ब्राह्मणश्चात्र क्षत्रियो वैश्य एव च ।
न शूद्रो न च वै म्लेच्छो भेदिता गुणकर्मभिः ।।
शान्तो दान्तो दयालुश्च ब्राह्मणश्च गुणैः कृतः ।। —शुक्रनीति, १, पंक्ति ७५-८०
न जातिः कारणं तात गुणाः कल्याणकारकम् ।

वृत्तस्थमपि चाण्डालं तं देवा ब्राह्मणं विदुः । —व्यास-वचनम्, उद्धृत, यतिधर्म, पृ० ३७
मिश्रदेशोद्भवा म्लेच्छाः काश्यपेनैव शासिताः ।
संस्कृताः शूद्रवर्णेन ब्रह्मवर्णमुपागताः । —भविष्य-पुराण, प्रतिसर्ग, चतुर्थखण्ड
म्लेच्छास्ते वैष्णवाश्चासन् रामानन्दप्रभावतः । —भविष्य-पुराण, प्रतिसर्ग, चतुर्थ २१.५४

६१. श्वयुवमघोनामतद्धिते। पाणिनि व्याकरण सूत्र, ६.४.१३३
६२. दृप्तं, बंगाल-हस्तलेख।
६३. उत्पन्ना, पूना, मद्रास, बंगाल-हस्तलेख।
६४. ब्राह्म क्षत्रिय, बंगाल-हस्तलेख।
६५. य, मद्रास-हस्तलेख।
६६. -व-, पूना-हस्तलेख।
६७. वृषलीफेनपीतस्य। मनुस्मृति, ३.१९
६८. अङ्गिरस०, १.४८; आपस्तम्ब०, ८.७; व्यास०, ४.६७।
६९. शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिग् ।
नाश्नन्ति पितृदेवास्तत्र च स्वर्गं स गच्छति ।।
—मनुस्मृति, ३.१७-१८; महाभारत, अनु०, ४७.९
यस्य शूद्रा पच्चेन्नित्यं शूद्रा च गृहमेधिनी ।
बर्जितः पितृदेवैस्तु रौरवं याति स द्विजः ।। —व्यास०, ४.६८
७०. -चनप्रा-, बंगाल-हस्तलेख।
७१. सत्यकामो जाबालः "नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरं सा मां प्रत्यब्रवीद्। बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे। साहमेतन्न वेद यद्गोत्रस्त्वमसि। जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति। सोऽहं सत्यकामो जाबालोऽस्मि। भो इति।" ....तं होवाच नैतदब्राह्मणो विविक्तुमर्हसि, समिधं सौभ्याहरोप त्वा नेष्ये। (समानोद्धरण के लिए द्रष्टव्य) छान्दोग्योपनिषद्, ४.४
७२. हरिणी, अरिणी, मद्रास-हस्तलेख।
७३. कठिनो, बंगाल-हस्तलेख।
७४. (द्र०-श्लोक २३-२६)
हरिणीगर्भसम्भूत ऋष्यश्रङ्गो महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।।
श्वपाकीगर्भसम्भूतः पिता व्यासस्य पार्थिव ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।।
उलूकीगर्भसम्भूतः। कणादाख्यो महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।।
गणिकागर्भसम्भूतो वसिष्ठश्च महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।।

नाविकागर्भसम्भूतो मन्दपालो महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। —भविष्य-ब्राह्मण, ४२.२६-३०

७५. कैवर्त्तीगर्भम्भूतः कश्चिच्चा [ण्डालजातिमान् ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ।। १०४।।
—आचार्य आर्यदेव, चित्तविशुद्धिप्रकरण, विश्वभारती शान्तिनिकेतन, १९४९

७६. कुछ संस्करणों में यह श्लोक नहीं है, पूना, मद्रास-हस्तलेख।

७७. -शि-, पूना, बंगाल-हस्तलेख।

७८. ष्ठो नाम, बंगाल-हस्तलेख।

७९. -न्दु, मद्रास-हस्तलेख।

८०. नाम, बंगाल-हस्तलेख।

८१. भगवद्गीता, १.६.६-७

८२. -तिर्ब्र-, पूना, मद्रास, बंगाल-हस्तलेख।

८३. ये स्थिता ब्रह्मचर्येण ब्राह्मणास्ते०। यतिधर्म, पृ० ३३
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः।
—महाभारत, अनुस्मृति, १४३.५२; ब्रह्मपुराण, २२३.५९

८४. -ज्जातिर-, मद्रास-हस्तलेख।

८५. सत्यं दमस्तपो दानमहिंसा धर्मनित्यता ।
साधकानि सदा पुंसां न जातिर्न कुलं नृप ।। —महाभारत, वन-पर्व, १८१.४२-४३

८६. -ले, बंगाल-हस्तलेख।

८७. र्गे, मद्रास-हस्तलेख।

८८. शूद्रे चैतद् भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।।
—महाभारत, वन-पर्व, १८०.२५-२६; शान्ति-पर्व, १८९.८ तथा द्र०- मृच्छ०, ८.२९, वेणीसंहार, ३.३८

८९. कठिन, बंगाल-हस्तलेख।

९०. शि-, बंगाल-हस्तलेख।

९१. प्रभूततपो, मद्रास-हस्तलेख।

९२. ले, बंगाल-हस्तलेख।

९३. नप्रा-, बंगाल-हस्तलेख।

९४. अपि, बंगाल-हस्तलेख।

९५. -यं, बंगाल-हस्तलेख।

९६. स्मृतः, बंगाल-हस्तलेख।

९७. च शूद्र, बंगाल-हस्तलेख।

९८. ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।

ऊरू तदस्य यद् वैश्यः पद्‌भ्यां शूद्रोऽजायत ।।
—ऋग्वेद १०.९०.१२; अथर्ववेद १९.६.६; वेणीसंहार, ३१.११; तैत्तरीय आरण्यक ३.१२.५
लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ।।
—मनुस्मृतिः, श्री पं० गोपालशास्त्री नेने, चौखम्भा संस्कृत संस्थान, १९७०

९९. -दन्त, पूना, मद्रास-हस्तलेख।

१००. -दिसंस्का-, पूना, मद्रास-हस्तलेख।

१०१. -क्षत्रा-, बंगाल-हस्तलेख।

१०२. चत्वार एकस्य पितुः सुताश्च तेषां सुतानां खलु जातिरेका ।
एवं प्रजानां हि पितैक एव पित्रैकभावान्न च जातिभेदः ।। —भविष्य-ब्राह्मण, ४१.४५
सर्वे वर्णा ब्राह्मणा ब्रह्मजाश्च,
सर्वे यित्यं व्याहरन्ते स्म ब्रह्म ।
तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि
सर्वं विश्वं ब्रह्म चैतत्समस्तम् ।। —महाभारत, शान्ति-पर्व, ३१८.८९

१०३. (श-क्ष के लिए तुलनीय, द्र०-समानोद्धरण)
गोवर्गमध्यं च गतो यथाश्वो निर्धार्यते ज्ञैः सुविचक्षणत्वात् ।
मनुष्यभावादविशिष्यमाणस्तद्वद् द्विजः शूद्रगणान्न भिन्नः ।। —भविष्य-ब्राह्मण, ४०.२०
न सुखादौ न चैश्वर्ये नाज्ञायां नो भयेष्वपि ।
न वीर्ये नाकृतौ नाक्षे न व्यापारे न चायुषि ।।
नाङ्गे पुष्टे न दौर्बल्ये न स्थैर्ये नापि चापले ।
प्रज्ञायां न वैराग्ये न धर्मे न पराक्रमे ।।
न त्रिवर्गे न नैपुण्ये न रूपादौ न भेषजे ।
न स्त्रीगर्भे न गमने न देहमलसंप्लवे ।
नास्थिरन्ध्रे न च प्रेम्णि न प्रमाणे न लोमसु ।
शूद्रब्राह्मणयोर्भेदो मृग्यमाणोऽपि यत्नतः ।
नेक्ष्यते सर्वधर्मेषु संहतैस्त्रिदशैरपि ।।
पादप्रचारैस्तनुवर्णकेशैः सुखेन दुःखेन च शोणितेन ।
त्वङ्मांसमेदोऽस्थिरसैः समानाश्चतुःप्रभेदा हि कथं भवन्ति।।
वर्णप्रमाणाकृतिगर्भवासवाग्बुद्धिकर्मेन्द्रियजीवितेषु ।
बलत्रिवर्गामयभेषजेषु न विद्यते जातिकृतो विशेषः ।।
—पुस्तक सं० १, भविष्य-ब्राह्मण, ४१.३५-४३
वाङ्मैथुनमथ जन्म मरणञ्च समं नृणाम् ।। —महाभारत, वन-पर्व, १८०.३२
काम क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्वेषां नः प्रभवति कस्माद्वर्णो विभिद्यते ।।
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितम् ।

तनुः क्षरति सर्वेषां कस्माद्वर्णो विभाज्यते ।।
—महाभारत, शान्ति-पर्व, १८८.७-८
यथा भस्मनि सौवर्णे विशेष उपलभ्यते ।
ब्राह्मणे चान्य का नु तत्र विशेषता ।।
—महाभारत, शान्तिपर्व, १८८.७.८
यथा एतासु जातीसु लिङ्गं जातिमयं पुथु ।
एवं नत्थि मनुस्सेसु ...यथा अञ्ञासु जातिसु ।। —सुत्तनिपात, ३.९.१४-१७
न केशेन न कर्णाभ्यां न शीर्षेण न चक्षुषा ।
न मुखेन न नासया .... ।।
नानाविशेषः सर्वेषु मनुष्येषु न विद्यते ।।
तथा गद्य में—'तद्यथा......न चैवं चतुर्णां वर्णानां नानाकरणं प्रज्ञायते।'
—शार्दूलकर्णावदान (दिव्यावदान), पृ० १८, २४, २६

१०४. च, बंगाल-हस्तलेख।
१०५. -सर-, बंगाल-हस्तलेख।
१०६. पदतो, पूना, मद्रास-हस्तलेख।
१०७. ब्रह्म, पूना, मद्रास-हस्तलेख।
१०८. पञ्चभूतात्मकं शुक्रं शोणितञ्चापि तादृशम् ।
तन्मयः खलु पिण्डोऽयं को विप्रः कश्च वान्तपजः।। १०२।।
—आचार्य आर्यदेव, चित्तविशुद्धिप्रकरण, विश्वभारती शान्तिनिकेतन, १९४९
१०९. स्य-, पूना, हस्तलेख।
११०. फलान्यथोदुम्बरवृक्षजातेर्यथाग्रमध्यान्तभवानि यानि ।
वर्णाकृतिस्पर्शरसैः समानि तथैकता जातेरिति प्रचिन्त्यम् ।।
—पुस्तक सं० १, भविष्य-ब्राह्मण, ४१.४६
१११. ब्राह्मण जातो ब्राह्मण्याः-, बंगाल-हस्तलेख।
११२. चतुर्वर्ण्यं प्रवक्ष्यामि पशुधर्मकथां तव ।
भवेत्ते भगिनी भार्या नैतद् ब्राह्मण युज्यते ।।
यदि तावदयं लोको ब्रह्मणा जनितः स्वयम् ।
ब्राह्मणी ब्राह्मणस्वसा क्षत्रिया क्षत्रियस्वसा ।।
अथ वैश्यस्य वैश्या वै शूद्रा शूद्रस्य वा पुनः ।
न भार्या भगिनी युक्ता ब्रह्मणा जनिता यदि ।।
न सत्त्वा ब्रह्मणो जाताः क्लेशजाः कर्मजास्त्वमी।
नीचैश्चोच्चैश्च दृश्यन्ते सत्त्वा नानाश्रयाः पृथक्।।
तेषां च जातिसामान्याद् ब्राह्मणे क्षत्रिये तथा ।
तथा वैश्ये च शूद्रे च समं ज्ञानं प्रवर्तते ।।
—द्रिव्यावदान (शार्दूलकर्णावदान), पृ० ६३६

---

११३. पण्डितो, पूना, मद्रास, बंगाल-हस्तलेख।

११४. -चै-, बंगाल-हस्तलेख।

११५. निधाय दण्डं भूतेसु तसेसु थावरेसु च ।
यो न हन्ति न घातेति तमहं ब्रूमि ब्राह्मणं ।।
—धम्मपद, ब्राह्मणवग्गो २६, श्लोक २३

११६. योऽध दीघं वा रस्सं वा अणुं थुलं सुभासुभं ।
लोके अदिन्नं नादियति तमहं ब्रूमि ब्राह्मणं ।।
—धम्मपद,ब्राह्मणवग्गो २६, श्लोक २७
ग्रामे गृहे वा ये द्रव्यं पारक्यं विजने स्थितम् ।
नाभिनन्दति वै नित्यं..........................।।
—महाभारत, अनुशासन-पर्व, १४४.३२

११७. -स्य-, बंगाल-हस्तलेख।

११८. क्रोधः शत्रुः शरीरस्थो मनुष्याणां द्विजोत्तम ।
यः क्रोधमोहौ त्यजति तं देवा ब्राह्मणं विदुः ।।
यो वेदेदिह सत्यानि गुरुं संतोषयेत च ।
हिंसितश्च न हिंसेत तं देवा ब्राह्मणं विदुः ।।
जितेन्द्रियो धर्मपरः स्वाध्यायनिरतः शुचिः ।
कामक्रोधो वशे यस्य तं देवा ब्राह्मणं विदुः ।।
यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विनः ।
सर्वधर्मेषु चरतस्तं देवा ब्राह्मणं विदुः ।।
धर्मं तु ब्राह्मणस्याहुः स्वाध्यायं दममाजवम् ।
इन्द्रियाणां निग्रहं च शाश्वतं द्विजसत्तम ।। —महाभारत, वन-पर्व, २०६.३२-९
शौचेन सततं युक्तः सदाचारसमन्वितः ।
सानुक्रोशश्च भूतेषु तद् द्विजातिषु लक्षणम् ।। —महाभारत, शान्ति-पर्व, १८९.१८

११९. मनुष्य, बंगाल-हस्तलेख।

१२०. -ते-, मद्रास-हस्तलेख।

१२१. -न्तु, बंगाल-हस्तलेख।

१२२. तीर्थशौचमनर्थित्वमार्जवं सत्यमार्दवम् ।
अहिंसा सर्वभूतानामानृशंस्यं दमः शमः ।।
—महाभारत, अनुशासन-पर्व, १०८.४
अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ।।
क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्यकारिणः ।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमः ।। —मनुस्मृति, ५.१०६-९

केवलं गुणसम्पन्नः शुचिरेव नरः सदा ।।
—महाभारत, अनुशासन-पर्व, १०८.१४
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्वभूतदयातीर्थं सन्तोषस्तीर्थमेव च ।।
ब्रह्मचर्यं परं तीर्थं नियमस्तीर्थमुच्यते ।
ज्ञाननं तीर्थं धृतिस्तीर्थमहिंसा तीर्थमुच्यते ।।
—पद्म-पुराण, २.२३७; १२-१५ (आनन्दाश्रम, पूना, संस्करण)

१२३. न च, बंगाल-हस्तलेख।

१२४. चण्डालौ, पूना-हस्तलेख।

१२५. न कुलेन न जात्या वा क्रियाभिर्ब्राह्मणो भवेत् ।
चण्डालोऽपि हि वृत्तस्थो ब्राह्मणो यक्षपुङ्गव ।।
शृणु यक्ष कुलं तात न स्वाध्यायो न च श्रुतम् ।
कारणं हिं द्विजत्वे तु वृत्तमेव न संशयः ।।
—महाभारत, वन-पर्व, ३१३.१०८
न जटाहि न गोत्तेन न जच्चा होति ब्राह्मणो ।
यम्हि सच्चं च धम्मो च सो सुची सो च ब्राह्मणो ।।
—धम्मपद, ब्राह्मणवग्गो २६, श्लोक ११

१२६. अहिंसा ब्रह्मचर्यं च विशुद्धाच्च प्रतिग्रहः ।
फलेन न समर्थं च ब्राह्मणः स्याद्युधिष्ठर ॥
यह श्लोक बंगाल तथा इण्डिया आफिस, लन्दन हस्तलेख के कोष्ठक में ही उपलब्ध है ।

१२७. किं ब्राह्मणा ये सुकृतं त्यजन्ति किं क्षत्रिया लोकमपालयन्तः ।
स्वधर्महीना हि तथैव वैश्याः शूद्राः स्वमुख्यक्रियया विहीनाः ।।
तस्मात्र गोऽश्ववत्कश्चिज्जातिभेदोऽस्ति देहिनाम् ।
कार्यशक्तिनिमित्तस्तु संकेतः कृत्रिमो भवेत् ।।
—भविष्य, ब्राह्मण, ४०.३३-३४
न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ।।
—महाभारत, शान्ति-पर्व, १८८.१०
एकवर्णमिदं ....शूद्रात्प्रत्यवरो भवेत् ।
—महाभारत, अनुशासन-पर्व, १०८.१३
एक एव पुरावेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नम्न्य एकोऽग्निर्वर्ण एव च ।। —भागवत, ९.१४.४८
वर्णाश्रमव्यवस्थाश्च न तदाऽसन् न संकरः । —वायु-पुराण, ८.६१

१२८. -त्यपरो, बंगाल, मद्रास-हस्तलेख।

१२९. शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः ।

ब्राह्मणो वाप्यसद्वृत्तः ....शूद्रो भवति तादृशः ।।
—महाभारत, अनुशासन-पर्व, १४३.४६-४७

यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः ।
तमहं ब्राह्मणं मन्ये वृत्तेन हि भवेद् द्विजः ।।
—महाभारत, वन-पर्व, २१६.१५

चतुर्वेदोऽपि दुर्वृत्तो न शूद्रादतिरिच्यते ।।
—महाभारत, वन-पर्व, ३१३.१११

वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति।।
—महाभारत, अनुशासन-पर्व, १४३.५१

न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।
—महाभारत, वन-पर्व, १८०.२५-२६; शान्ति-पर्व, १८९.८

शूद्रोऽपि शीलसम्पन्नो ब्राह्मणादधिको भवेत्।
ब्राह्मणो विगताचारः शुद्राद्धीनतरो भवेत् ।।
—भविष्य, पुस्तक सं० १, ४४

१३०. -र्थं, पूना, मद्रास-हस्तलेख।

१३१. जीवितं यस्य धर्मार्थं धर्मो ह्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ।। —महाभारत, शान्ति-पर्व, २४५.२३

१३२. योध कामे पहत्वान अनागारो परिब्बजे ।
कामभवपरिक्खीणं तमहं ब्रूमि ब्राह्मणं ।। —धम्मपद, ब्राह्मणवग्गो २६, श्लोक ३३

१३३. वा-, बंगाल, मद्रास-हस्तलेख।

१३४. -धिः, पूना-हस्तलिखित, मद्रास-हस्तलेख।
खसारं मातरं श्वश्रूं स्वपुत्रीं भागिनेयिकाम् ।
ब्राह्मणीं क्षत्रियां वैश्यां विधिज्ञानेन शूद्रिकाम्] ।।१०५।।
एकाङ्गविकलां हीनां गर्हितामन्त्यजामपि ।
योषितं पूजयेन्नित्यं ज्ञानवज्रप्रभावनैः ।।१०६।।
—आचार्य आर्यदेव, चित्तविशुद्धिप्रकरण, विश्वभारती शान्तिनिकेतन, १९४९

१३५. हेयोपादेयतत्त्वज्ञास्त्यक्तान्यायपथागमाः ।
जितेन्द्रियमनोवाचः सदाचारपरायणाः ।।१।।
नियमाचारवृत्तस्था हितान्वेषणतत्पराः ।
संसाररक्षणोपायक्रियायुक्तमनोरथाः ।।२।।
सम्यग्दर्शनसम्पन्नाः समाधिस्था हतक्रुधः ।
स्वाध्यायभक्तहृदयास्त्यक्तसङ्गा विमत्सराः ।।३।।
विशोका विमदाः शान्ताः सर्वप्राणिहितैषिणः ।
सुखदुःखसमालोका विविक्तस्थानवासिनः ।।४।।

व्रतोपयुक्तसर्वाङ्गा धार्मिकाः पापभीरवः ।
निर्ममा निरहङ्कारा दानशूरा दयापराः ॥५॥
सत्यब्रह्मविदः शान्ता सर्वशास्त्रेषु निष्ठिताः ॥६॥
ब्रह्मणा कृतमर्यादास्त एव ब्राह्मणाः स्मृताः ॥७॥
योगस्तपो दया दानं सत्यं धर्मश्रुतिर्घृणा ।
ज्ञानं विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् ॥२८॥
यत्र वा तत्र वा वर्णे उत्तमाधममध्यमाः ।
निवृत्तः पापकर्मेभ्यो ब्राह्मणः स विधीयते ॥३०॥ —भविष्य, ब्राह्मण, ४४
सत्यं दानमथाद्रोहमानृशंस्यं तपो घृणा ।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृताः ॥
—महाभारत, वन-पर्व, १८०.२१; शान्ति-पर्व, १८९.४
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ —भगवद्गीता, १८.४२

१३६. मन्त्र-, बंगाल-हस्तलेख।

१३७. चरन्, पूना, बंगाल, मद्रास-हस्तलेख।

१३८. नाधीत्य चतुरो वेदान्, पूना-हस्तलिखित, मद्रास-हस्तलेख।

१३९. सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितस्त्रिवेदोऽपि सर्वाशो सर्वविक्रयी ॥ —मनुस्मृति, २.११८

१४०. एकरात्रोषितस्यापि यतेर्या गतिरुच्यते ।
न सा शक्या गृहस्थेन प्राप्तं क्रतुशतैरपि ॥ —विष्णु-वचनम्, उद्धृत, यति-धर्म, पृ० २०

१४१. युक्त-, बंगाल-हस्तलेख।

१४२. निर्मुक्तं बन्धनैः सर्वैस्तं देवा ब्राह्मणं विदुः। —महाभारत, शान्ति-पर्व, २४५.२४

१४३. यदा न कुरुते—महाभारत, आदि-पर्व, ७५.५२; शान्ति-पर्व, ७४.५७; २५०.६; २६१.१७; हरिवंश, ३०.४३
यस्स कायेन वाचया मनसा नत्थि दुक्कटं ।
संवुतं तीहि ठानेहि तमहं ब्रूभि ब्राह्मणं ॥ —धम्मपद, ब्राह्मणवग्गो २६, श्लोक ९
अभयं सर्वभूतेभ्यः सर्वेषामभयं यतः ।
सर्वभूतात्मभूतो यस्तं देवा ब्राह्मणं विदुः ॥ —महाभारत, शान्ति-पर्व, २६९.३३
न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ॥ —महाभारत, शान्ति-पर्व, २४५.१४

१४४. इति लघुटङ्कः, मद्रास-हस्तलेख।